प्लीत्वा, प्लाययित्वा, पिप्लीषित्वा, पेप्लीयित्वा ;
संप्लीय, संप्लाय्य, प्रपिप्लीष्य, प्रपेप्लीय्य ;
प्लायम् २, प्लीत्वा २, } प्लायम् २, प्लाययित्वा २, } पिप्लीषम् २, पिप्लीषित्वा २, } पेप्लीयम् २; पेप्लीयित्वा २. }

(1082) "प्लुङ् गतौ" (I-भ्वादिः-958. सक. अनि. आत्म.)

प्लावकः-विका, प्लावकः-विका, पुप्लूषकः-षिका, [1]पोप्लूयकः-यिका, [2]पुप्लावयिषकः-पिप्लावयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकच्यवतिवत् (558) बोध्यानि । [3]प्लवः-प्लवी, [4]आप्लावः-[A]आप्लवः, ण्यति-[5]आप्लाव्यः, [6]परिप्लूय इत्यादीनि रूपाणि अस्य धातोर्भवन्तीति विशेषः ।

(1083) "प्लुष दाहे" (IV-दिवादिः-1115.1216. सक. सेट्. पर).[अ]

'.......दाहकर्मणि ॥ प्लोषति प्लुष्यतीति स्तां, प्लुष्णाति स्नेहनादिषु ।'
(श्लो. 171-172) इति देवः ।

प्लोषकः-षिका, प्लोषकः-षिका, पुप्लुषिषकः-पुप्लोषिषकः-पिका,

---

1. यङन्तात् द्वित्वे 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासस्य गुणे 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घे च रूपमेवम् ।
2. ण्यन्तात् सनि 'सन्यङोः' (6-1-9) इति द्वित्वे वृद्धयावादेशयोः अवर्णपरयण्परकत्वादभ्यासघटितोकारस्य, 'स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' (7-4-81) इति पाक्षिके इकारे रूपद्वयम् । एवं सर्वत्र ण्यन्तात् सनि प्रक्रिया ज्ञेया ।
3. पचादिषु (3-1-134) प्लवट् इति पाठात् टित्त्वान्ङीपि स्त्रियां प्लवी इति ज्ञेयम् ।
4. 'विभाषाऽऽङि रुप्लुवोः' (3-3-50) इति विभाषया घञ् भवति । घञभावे अप्प्रत्ययः । एवं रूपद्वयं बोध्यम् ।
5. 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा' (3-4-68) इति निपातनात् कर्तरि ण्यत्प्रत्ययः ।
6. ल्यपि 'युप्लुवोर्दीर्घश्छन्दसि' (6-4-58) इति छन्दसि विषये दीर्घः । लोके तु आप्लुत्य इत्येव ।

A. 'दूराप्लावं हनूमन्तं रामः प्रोचे गजाप्लवः ॥' भ. का. 7.47.

[अ] दिवादिष्वेव प्लुषधातुर्द्विवारं पठ्यते—पुषादावन्यत्र च । तत्र पुषादिपाठाद् अप्लुषत् इति अङ्सिद्धिः फलम् । अन्यत्र तु, अप्लोषीत् इति सिचस्सिद्धिः फलमिति विशेषः । कृदन्तेषु तु द्वयोस्तुल्यतेत्यतोऽस्माभिरेकदैवोभयोरुपादानमादृतम् ।